# શ્રીગોવિન્દવિરુદાવલી

Shri Govindavirudavali

sanskritdocuments.org

February 23, 2019

# Shri Govindavirudavali

# શ્રીગોવિન્દવિરુદાવલી

## Sanskrit Document Information

Text title : govindavirudAvalI

File name : govindavirudAvalI.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 23, 2019

*sanskritdocuments.org*

# શ્રીગોવિન્દવિરુદાવલી

ॐ નમઃ કૃષ્ણાય ।
ઇયં મઙ્ગલરૂપાસ્યાદ્ ગોવિન્દવિરુદાવલી ।
યસ્યાઃ પઠનમાત્રેણ શ્રીગોવિન્દઃ પ્રસીદતિ ॥ ૧॥

બ્રહ્મા બ્રહ્માણ્ડભાણ્ડે સરસિજનયનસ્રષ્ટુમાક્રીડનાનિ
　　સ્થાનુર્ભઙ્કું ચ ખ્લેઆખુરલિતમતિના તાનિ યેન ન્યયોજિ ।
તાદૃક્ક્રીડાણ્ડકોટીવૃતજલકુડવા યસ્ય વૈકુણ્ઠકુલ્યા
　　કર્તવ્યા તસ્ય કા તે સ્તુતિરિહ કૃતિભિઃ પ્રોજ્ઝ્ય લીલાયિતાનિ ॥ ૨॥

## ૧

નિવિડતરતુરાષાડન્તરીણોષ્મસમ્પદ્
　　વિઘટનપટુખેલાડમ્બરોર્મિચ્છટસ્ય ।
સગરિમગિરિરાજચ્છત્રદણ્ડાયિતશ્રી-
　　ર્જગદિદમઘશત્રોઃ સવ્યબાહુર્ધિનોતુ ॥ ૩॥

॥ ચણ્ડવૃત્તાયાઃ કલિકાખ્યાયા નખે વર્ધિતમ્ ॥

અભ્રમુપતિમમદમર્દિપદક્રમ
વિભ્રમપરિમલલિપ્તસુહૃચ્છ્રમ
દુષ્ટદનુજબલદર્પવિમર્દન
તુષ્ટહૃદયસુરપક્ષવિવર્ધન
દર્પકવિલસિતસર્ગનિરર્ગલ
સર્પતુલિતભુજ કર્ણગકુણ્ડલ
નિર્મલમલયજચર્ચિતવિગ્રહ
નર્મલલિતકૃતસર્પવિનિગ્રહ
દુષ્કરકૃતિભરલક્ષણવિસ્મિત
પુષ્કરભવભયમર્દનસુસ્મિત

વત્સલહલધરતર્કિતલક્ષણ
વત્સરવિરહિતવત્સસુહૃદ્ગણ
ગર્જિતવિજયિવિશુદ્ધતરસ્વર
તર્જિતખલગણદુર્જનમત્સર
॥ વીર ॥

તવ મુરલીધ્વનિરમરી
    કામામ્બુધિવૃદ્ધિશુભ્રાંશુઃ ।
અચટુલગોકુલકુલજા
    ધરિયામ્બુધિપાનકુમ્ભજો જયતિ ॥ ૪॥

ધૃતગોવર્ધન સુરભીવર્ધન
પશુપાલપ્રિય રચિતોપક્રિય
॥ ધીર ॥

## ૨

ભુજઙ્ગરિપુચન્દ્રકસ્ફુરદખણ્ડચૂડાઙ્કુરે
    નિરઙ્કુશદૃગઞ્ચલ ભ્રમિનિબદ્ધભૃઙ્ગભ્રમે ।
પતઙ્ગદુહિતુસ્તટીવનકુટીરકેલિપ્રિયે
    પરિસ્ફુરતુ મે મુહુસ્ત્વયિ મુકુન્દ શુદ્ધા રતિઃ ॥ ૫॥

॥ વીરભદ્ર ॥

ઉદ્યદ્વિદ્યુદ્દ્યુતિપરિચિતપટ
સર્પત્સર્પસ્ફુરદુરુભુજતટ
સ્વસ્થસ્વસ્થત્રિદશયુવતિનુત
રક્ષદ્દક્ષપ્રિયસુહૃદનુસૃત
મુગ્ધસ્નિગ્ધવ્રજજનકૃતસુખ
નવ્યશ્રવ્યસ્વરવિલસિતમુખ
હસ્તન્યસ્તસ્ફુટસરસિજવર
સર્જદ્ગર્જત્ખલવૃષમદહર
યુદ્ધક્રુદ્ધપ્રતિભટલયકર
વર્ણસ્વર્ણપ્રતિમતિલકધર ।
રુષ્યત્તુષ્યદ્યુવતિષુ કૃતરસ

ભક્તવ્યક્તપ્રણયમનસિ વસ

॥ વીર ॥

પ્રચુરપરમહંસૈઃ કામમાચમ્યમાને
    પ્રણતમકરચક્રૈઃ શશ્વદાક્રાન્તાકુક્ષૌ ।
અઘહર જગદણ્ડાહિણ્ડિહિલ્લોલહાસે
    સ્ફુરતુ તવ ગભીરે કેલિસિન્ધૌ રતિર્નઃ ॥ ૬॥

ઉદ્ગીર્ણતારુણ્ય વિસ્તીર્ણકારુણ્ય

ગુઞ્જાલતાપિઞ્છપુઞ્જાઢ્યતાપિઞ્છ

॥ વીર ॥

## ૩

ઉચિતઃ પશુપત્યલઙ્ક્રિયાયૈ
    નિતરાં નન્દિતરોહિણીયશોદઃ ।
તવ ગોકુલકેલિસિન્ધુજન્મા
    જગદુદ્દીપયતિ સ્મ કીર્તિચન્દ્રઃ ॥

॥ સમગ્રઃ ॥

અરિષ્ટખણ્ડન સ્વભક્તમણ્ડન

પ્રયુક્તચન્દન પ્રપન્નનન્દન

પ્રસન્નચઞ્ચલ સ્ફુરદ્દૃગઞ્ચલ

શ્રુતિપ્રલમ્બક ભ્રમત્કદમ્બક

પ્રકૃષ્ટકન્દરપ્રવિષ્ટ સુન્દર

સ્થવિષ્ઠસિન્ધુરપ્રસર્પબન્ધુર

॥ દેવ ॥

વૃન્દારકતરુવીતે વૃન્દાવનમણ્ડલે વીર ।
નન્દિતબાન્ધવવૃન્દ સુન્દર વૃન્દારિકા રમય ॥ ૮॥

ખલિનીડુમ્બક મુરલીચુમ્બક

જનનીવન્દકપશુપીનન્દક

॥ વીર ॥

૪

અનુદિનમનુરક્તઃ પદ્મિનીચક્રવાલે
    નવપરિમલમાદ્યચ્ચઞ્ચરીકાનુકર્ષી ।
કલિતમધુરપક્ષઃ કોઽપિ ગમ્ભીરવેદી
    જયતિ મિહિરકન્યાકૂલવન્યાકરીન્દ્રઃ ॥ ૯॥

॥ અચ્યુતઃ ॥

જય જય વીર સ્મરરસધીર
દ્વિજજિતહીર પ્રતિભટવીર
સ્ફુરૌરુહાર પિર્યપરિવાર
ચ્છુરિતવિહાર સ્થિરમણિહાર
પ્રકટિતરાસ સ્તવકિતહાસ
સ્ફુટપટવાસ સ્ફુરિતવિલાસ
ધ્વનદલિજાલસ્તુતવનમાલ
વ્રજકુલપાલ પ્રણયવિશાલ
પ્રવિલસદંસ ભ્રમદવતંસ
ક્વણદુરુવંશસ્વનહૃતહંસ
પ્રશમિતદાવ પ્રણયિષુ તાવદ્
વિલસિતભાવ સ્તનિતવિરાવ
સ્તનઘનરાગશ્રિતપરભાગ
ક્ષતહરિયાગ ત્વરિતધૃતાગ
॥ વીર ॥

સ્થિતિનિયતિમતીતે ધીરતાહારિગીતે
    પ્રિયજનપરિવીતે કુઙ્કુમાલેપપ્રીતે ।
કલિતનવકુટીરે કાઞ્ચ્યુદઞ્ચત્કટીરે
    સ્ફુરતુ રસગભીરે ગોષ્ઠવીરે રતિર્નઃ ॥ ૧૦॥

અમ્બાવિનિહિત ચુમ્બામલતર
બિમ્બાધરમુખલમ્બાલક જય
॥ દેવ ॥

## ૫

દૃષ્ટ્વા તે પદનકકોટિકાન્તિપૂરં
    પૂર્ણાનામપિ શશિનાં શતૈર્દુરાપમ્ ।
નિર્વિણ્ણો મુરહર મુક્તરૂપદર્પઃ
    કન્દર્પઃ સ્ફુટમશરીરતામયાસીત્ ॥ ૧૧॥

॥ ઉત્પલમ્ ॥

નર્તિતશર્કરકૃતકર્કર
વૃદ્ધમરુદ્ભરતર્દન નિર્ભર
દુષ્ટવિમર્દન શિષ્ટવિવર્ધન
સર્વવિલક્ષણ મિત્રકૃતક્ષણ
સદ્ભુજલક્ષિતપર્વતરક્ષિત
નિષ્ઠુરગર્જન ખિન્નસુહૃજ્જન
રુષ્ટદિવસ્પતિગર્વસમુન્નતિ
તર્જનવિભ્રમ નિર્ગલિતભ્રમ
શક્રકૃતસ્તવ વિસ્ફુરદુત્સવ
॥ વીર ॥

બુદ્ધીનાં પરિમોહનઃ કિલ હ્રિયામુચ્ચાટનઃ સ્તમ્ભનો
    ધર્મોદગ્રભિયાં મનઃકરટિનાં વશ્યત્વનિષ્પાદનઃ ।
કાલિનીદ્કલહંસ હન્ત વપુષામાકર્ષણઃ સુભ્રુવાં
    જીયાદ્ વૈણવપઞ્ચમધ્વનિમયો મન્ત્રાધિરાજઃ સ્તવઃ ॥ ૧૨॥

કાનનારબ્ધકાકલીશબ્દ
પાટવાકૃષ્ટ ગોપિકાદૃષ્ટ
ચાતુરીજુષ્ટરાધિકાતુષ્ટ
કામિનીલક્ષમોહને દક્ષ
ભાવિનીપક્ષ મામમું રક્ષ
॥ દેવ ॥

## ૬

અજર્જરપતિવર્તાહૃદયવજ્રભેદોદ્ધુરાઃ

કઠોરવરવર્ણિનીનિકરમાનવર્મચ્છિદઃ ।
અનઙ્ગધનુરુદ્ધતપ્રચલચિલ્લિચાપચ્યુતાઃ
ક્રિયાસુરઘવિદ્ વિષસ્તવ મુદં કટાક્ષેષવઃ ॥ ૧૩॥

॥ તુરઙ્ગ ॥

સઞ્ચલવિચકિલ કુણ્ડલ મણ્ડિતવરતનુમણ્ડલ
કુણ્ડલિપતિકૃતસઙ્ગર ખણ્ડિતભુવનભયઙ્કર
શઙ્કરકમલજવન્દિત કિઙ્કરનુતિલવનન્દિત
ગઞ્જિતસમદપુરન્દર ચઞ્ચલદમનધુરન્ધર
બન્ધુરગતિજિતસિન્ધુર ચન્દનસુરભિતકન્ધર
સુન્દરભુજલસદઙ્ગદ સઙ્ગદસખિગણરઙ્ગદ
ઝઙ્કૃતિકરમણિકઙ્કણ કુન્તલલુઠદુરુરઙ્ગણ
કુઙ્કુમારુચિલસદમ્બર લઙ્ગિમપરિમલડમ્બર
નન્દભવનવરમઙ્ગલ મઞ્જુલઘુસૃણસુપિઙ્ગલ
હિઙ્ગુલરુચિપદ પઙ્કજ સઞ્ચિતયુવતિસદઙ્ગજ
સન્તતમૃગમદપઙ્કિલ સન્તનુમયિ કુશલં કિલ
॥ વીર ॥

ગિરિતટીકુનટી કુલપિઙ્ગલે
ખલતૃણાવલિસઞ્જ્વલદિઙ્ગલે ।
પ્રખરસઙ્ગરસિન્ધુતિમિઙ્ગિલે
મમ રતિ વલતાં વ્રજમઙ્ગલે ॥ ૧૪॥

જય ચારુદામલલનાભિરામ
જગતીલલામ રુચિહૃતવામ
॥ વીર ॥

## ૭

ઉદિતહૃદયેન્દુમણિઃ પૂર્ણકલઃ કુવલયોલ્લાસી ।
પરિતઃ શાર્વરમથ નો વિલસતિ વૃન્દાટવીચન્દ્રઃ ॥ ૧૫॥

॥ ગુણરતિઃ ॥

પ્રકટીકૃતગુણ શકટીવિઘટન

નિકટીકૃતનવલકુટીવર વન
પટલીતટચર નટલીલમધુર
સુરભીકૃતવન સુરભીહિતકર
મુરલીવિલસિત ખુરલીહૃતજગદ્
અરુણાધર નવતરુણાયતભુજ
વરુણાલયસમકરુણાપરિમલ
કલભાયિતબલશલભાયિતખલ
ધવલાધૃતિહરગવલાશ્રિતકર
સરસીરુહધર સરસીકૃતનર
કલશીદધિહર કલશીલિતમુખ
લલિતારતિકર લલિતાવલિપર
॥ ધીર ॥

હરિણીનયનાવૃત પ્રભો કરિણીવલ્લભકેલિવિભ્રમ ।
તુલસીપ્રિયદાનવાઙ્ગનાકુલસીમન્તહર પ્રસીદ મે ॥ ૧૬॥

ચન્દનચર્ચિત ગન્ધસમર્ચિત
ગણ્ડવિવર્તનકુણ્ડલનર્તન
સન્દલદુજ્જ્વલકુન્દલસદ્દલ
સુન્દરવિગ્રહ નન્દલસદ્ગ્રહ
॥ વીર ॥

૮

રતિમનુવધ્ય ગૃહેભ્યઃ
કર્ષતિ રાધાં વનાય યા નિપુણા
સા જયતિ નિસૃષ્ટાર્થા
તવ વરવંશજકાકલી દૂતી ॥ ૧૭॥

॥ માતઙ્ગખેલિતમ્ ॥

નાથ હે નન્દગેહિનીશન્દ
પૂતનાપણ્ડપાતને ચણ્ડ
દાનવે દણ્ડકારકાખણ્ડ
સારપૌગણ્ડલીલયોદ્દણ્ડ

ગોકુલાલિન્દગૂઢ ગોવિન્દ
પૂર્તિઆમન્દરાધિકાનન્દ
વેતસીકુઞ્જ માધવીપુઞ્જ
લોકનારમ્ભ જાતસંરમ્ભ
દીપિતાનઙ્ગકેલિભાગઙ્ગ
ગોપસારઙ્ગલોચનારઙ્ગ
કારિમાતઙ્ગ ખેલિતાસઙ્ગ
સૌહૃદાશઙ્કયોષિતામઙ્ક
પાલિકાલમ્બચારુરોલમ્બ
માલિકાકણ્ઠ કૌતુકાકુણ્ઠ
પાટલીકુન્દમાધવીવૃન્દ
સેવિતોત્તુઙ્ગશેખરોત્સઙ્ગ
માં સદા હન્ત પાલયાનન્ત
॥ વીર ॥

સ્ફુરદિન્દીવરસુન્દર સાન્દ્રતરાનન્દકન્દલીકન્દ ।
માં તવ પદારવિન્દે નન્દય ગન્ધેન ગોવિન્દ ॥ ૧૮॥

કુન્દદશન બદ્ધરશન
રુક્મવસન રમ્યહસન
॥ દેવ ॥

## ૯

પ્રપન્નજનતાતમઃક્ષપણશારદેન્દુપ્રભા
વ્રજામ્બુજ વિલોચનસ્મરસમૃદ્ધિસિદ્ધૌષધિઃ ।
વિડમ્બિતસુધામ્બુધિપ્રબલમાધુરીડમ્બરા
બિભર્તુ તવ માધવ સ્મિતકડમ્બકાન્તિમુર્દમ્ ॥ ૧૯॥

॥ તિલકમ્ ॥

અમલકમલરુચિખઞ્જનપટુપદ
નટનપટિમહૃતકુણ્ડલિપતિમદ
નવકુવલયકુલસુન્દરરુચિભર
ઘનતડિદુપમિતબન્ધુરપટધર

તરણિદુહિતૃતટમઞ્જુલનટવર
નયનનટનજિતખઞ્જનપરિકર
ભુજતટગતહરિચન્દનપરિમલ
પશુપયુવતીગણનન્દનવરકલ
નવમદમધુરદૃગઞ્ચલવિલસિત
મુખપરિમલભરસઞ્ચલદલિવૃત
શરદુપચિતશશિમણ્ડલવરમુખ
કનકમકરમયકુણ્ડલકૃતસુખ
યુવતિહૃદયશુકપઞ્જરનિજભુજ
પરિહિતવિચકિલમઞ્જુલશિરસિજ
સુતનુવદનવિધુચુમ્બનપટુતર
દનુજનિવિડમદડુમ્બનરણખર
॥ વીર ॥

રણતિ હરે તવ વેણૌ
    નાર્યો દનુજાશ્ચ કમ્પિતાઃ ખિન્નાઃ ।
વનમનપેક્ષિતદયિતાઃ
    કરબાલાન્પ્રોજ્ઝ્ય ધાવન્તિ ॥ ૨૦॥

કુઙ્કુમપુણ્ડ્રક ગુમ્ફિતપુણ્ડ્રક
સઙ્કુલકઙ્કણ કણ્ઠગરઙ્ગણ
॥ દેવ ॥

## ૧૦

સારઙ્ગાક્ષીલોચનભૃઙ્ગાવલિપાનચારુભૃઙ્ગાર ।
ત્વાં મઙ્ગલશૃઙ્ગારં શૃઙ્ગારાધીશ્વર સ્તૌમિ ॥ ૨૧॥

॥ ચણ્ડવૃત્તસ્ય વિશિખે પઙ્કેરુહમ્ ॥

જય  ગતશઙ્ક પણયવિટઙ્ક
પ્રિયજનબઙ્કસ્મિતજિતશઙ્ખ
સ્ફુટતરશૃઙ્ગધ્વનિધૃતરઙ્ગ
ક્ષણનટદઙ્ગ પ્રણયિકુરઙ્ગ
વ્રજકૃતસઙ્ગશ્રુતિતટરિઙ્ગન્

મધુરસપિઙ્ગગ્રથિતલવઙ્ગ
સ્વનટનભઙ્ગવ્રણિતભુજઙ્ગ
સ્તવકિતતુઙ્ગક્ષિતિરુહશૃઙ્ગ
સ્થિતબહુભૃઙ્ગક્વણિતતરઙ્ગ
પ્રવલદનઙ્ગ ભ્રમદુરૂહભૃઙ્ગી
મુદિતકુરઙ્ગીદૃગુદિતભઙ્ગી
મૃદિમભિરઙ્ગીકૃતનવસઙ્ગી
તકદરબઙ્કેક્ષણ નવસઙ્કે
તગસુહૃદઙ્કેશય સકલઙ્કે
તરપૃષદઙ્કેડિતમુખ પઙ્કે
રુહપદ રઙ્કે કૃપય સપઙ્કે કિલ મયિ
॥ વીર ॥

ઉત્તુઙ્ગોદયશૃઙ્ગ સઙ્ગમજુષાં બિભ્રત્પતઙ્ગત્વિષાં
વાસસ્તુલ્યમનઙ્ગસઙ્ગરકલાશૌટીર્યપારઙ્ગતઃ ।
સ્વાન્તં રિઙ્ગદપાઙ્ગભઙ્ગિભિરલં ગોપાઙ્ગનાનાં ગિલન્
ભૂયાસ્ત્વં પશુપાલપુઙ્ગવદૃશોરવ્યઙ્ગરઙ્ગાય મે ॥ ૨૨॥

વિલસદલિકગતકુઙ્કુમપરિમલ
કુટિતધૃતમણિકિઙ્કિણિવરકલ
નવજલધરકુલલઙ્ગિમરુચિભર
મસૃણમુરલિકલભઙ્ગમધુરતર
॥ વીર ॥

## ૧૧

અવતંસિતમઞ્જુમઞ્જરે
તરુણીનેત્રચકોરપઞ્જરે ।
નવકુઙ્કુમપુઞ્જપિઞ્જરે
રતિરાસ્તાં મમ ગોપકુઞ્જરે ॥ ૨૩॥

॥ સિતકઞ્જમ્ ॥

જય કચચઞ્ચદ્દ્યુતિસમુદઞ્ચન્
મધુરિમપઞ્ચસ્તવકિતપિઞ્છ

સ્ફુરિત વિરિઞ્ચસ્તુત ગિરિકુઞ્જ
વ્રજપરિગુઞ્જન્મધુકરપુઞ્જ
દ્રુતમૃદુશિઞ્જ દ્વિષદહિગઞ્જ
વ્રતતિષુ ખઞ્જન્નવરસમઞ્જન્
મરુદતિપિઞ્જ પ્રવલિતમુઞ્જા
નલહર ગુઞ્જાપ્રિય ગિરિકુઞ્જા
શ્રિત રતિસઞ્જાગર નવકઞ્જા
મલકરઝઞ્ઝાનિલહર મઞ્જી
રજરવપઞ્જી પરિમલસઞ્જીવિત
નવપઞ્ચાશુગશરસઞ્ચા
રણજિતપઞ્ચાનનમદ
॥ ધીર ॥

કણિકારકૃતકર્ણિકાદ્યુતિ-
    ર્વર્ણિકાપદનિયુક્તગૈરિકા ।
મેચકા મનસિ મે ચકાસ્તુ મે
    મેચકાભરણ ભારિણી તનુઃ ॥ ૨૪॥

મદનરસઙ્ગત સઙ્ગતપરિમલ
ભુજતટરઙ્ગતરઙ્ગિતજિતબલ
યુવતિવિલમ્બિત લમ્બિતકચભર
કુસુમવિટઙ્કિત ટાઙ્કૃતગિરિવર
॥ વીર ॥

## ૧૨

ભ્રૂમણ્ડલતાણ્ડવિતપ્રસૂનકોદણ્ડચિત્રકોદણ્ડ ।
હૃત્પુણ્ડરીકગર્ભં મણ્ડય મમ પુણ્ડરીકાક્ષ ॥ ૨૫॥

॥ પાણ્ડૂત્પલમ્ ॥

જય જય દણ્ડપ્રિય કચખણ્ડ
ગ્રથિતશિખણ્ડ વ્રજ શશિખણ્ડ
સ્ફુરણસપિણ્ડસ્મિતવૃતગણ્ડ
પ્રણયકરણ્ડ દ્વિજપતતુણ્ડ

સ્મરરસકુણ્ડ ક્ષતફણિમુણ્ડ
પ્રકટપિચણ્ડસ્થિતજગદણ્ડ
ક્વણદનુઘણ્ટ સ્ફુટરણઘણ્ટ
સ્ફુરદુરુશુણ્ડાકૃતિભુજદણ્ડા
હતખલચણ્ડાસુરગણ પણ્ડાજનિત
વિતણ્ડાજિતબલ ભાણ્ડીર
દયિત ખણ્ડીકૃતનવહિણ્ડીર
ભદધિહણ્ડીગણ કલકણ્ઠી
કૃતકલકણ્ઠીગણ મણિકણ્ઠી
સ્ફુરિતસુકણ્ઠીપ્રિય
વરકણ્ઠિરવરણ
॥ ધીર ॥

દણ્ડી કુણ્ડલિભોગકાણ્ડનિભયોરુદ્દણ્ડદોર્દણ્ડયોઃ
    શ્લિષ્ટશ્ચણ્ડિમડમ્બરેણ નિવિડશ્રીખણ્ડપુણ્ડ્રોજ્જ્વલઃ ।
નિર્ધૂતોદ્યદચણ્ડરશ્મિઘટયા તુણ્ડશ્રિયા મામકં
    કામં મણ્ડય પુનણ્ડરીકનયન ત્વં હન્ત હૃન્મણ્ડલમ્ ॥ ૨૬॥

કન્દર્પકોદણ્ડદર્પક્રિયોદ્દણ્ડ
દૃગ્ભઙ્ગિકાણ્ડીર સઞ્જુષ્ટભાણ્ડીર
॥ ધીર ॥

## ૧૩

ત્વમુપેન્દ્ર કલિન્દનન્દિની
    તટવૃન્દાવનગન્ધસિન્ધુર ।
જય સુન્દર કાન્તિકન્દલૈઃ
    સ્ફુરદિન્દીવરવૃન્દબન્ધુભિઃ ॥ ૨૭॥

॥ ઇન્દીવરમ્ ॥

જય જય હન્ત દ્વિષદભિહન્તર્મધુરિમસન્તર્પિતજગદન્ત-
મૃદુલ વસન્તપ્રિય સિતદન્ત સ્ફુરિતદૃગન્ત પ્રસરદુદન્ત
પ્રભવદનન્તપ્રિયસખ સન્તસ્ત્વયિ રતિમન્તઃ સ્વમુદહરન્ત
પ્રભુવર નન્દાત્મજગુણકન્દાસિતનવકન્દાકૃતિધર કુન્દા

મલરદ તુન્દાત્તભુવન વૃન્દાવનભવગન્ધાસ્પદમકરન્દા
નિવ્તનવમન્દારકુસુમવૃન્દાર્ચિતકચ વન્દારુનિખિલવૃન્દા
રકવરવન્દીડિત વિધુસન્દીપિતલસદિન્દીવરપરિનિન્દી
ક્ષણયુગ નન્દીશ્વરપતિનન્દીહિત જય
॥ ધીર ॥

સ્મિતરુચિમકરન્દસ્યન્દિ વક્ત્રારવિન્દં
    તવ પુરુપરહંસાન્વિષ્ટગન્ધં મુકુન્દ ।
વિરચિતપશુપાલીનેત્રસારઙ્ગરઙ્ગં
    મમ હૃદયતડાગે સઙ્ગમઙ્ગીકરોતુ ॥ ૨૮॥

અમ્બરગતસુરવિનતિવિલમ્બિત
તુમ્બુરુપરિભવમુરલિકરમ્બિત
શમ્બરમુખમૃગનિકરકુટુમ્બિત
સમ્ભમ્વવલ્ગિતયુવતિ વિચુમ્બિત
॥ વીર ॥

## ૧૪

અમ્બુજકુટુમ્બદુહિતુઃ કદમ્બસમ્બાધબન્ધુરે પુલિને ।
પીતામ્બર કુરુ કેલિં ત્વં વીરનિતમ્બિનીઘટયા ॥ ૨૯॥

॥ અરુણામ્ભોરુહમ્ ॥

જય રસસમ્પદ્વિરચિતઝમ્પ સ્મરકૃતકમ્પ પ્રિયજનશમ્પ
પ્રવણિતકમ્પસ્ફુરદનુકમ્પ દ્યુતિજિતશમ્પસ્ફુટનવચમ્પ
શ્રિતકચગુમ્પ શ્રુતિપરિલમ્બસ્ફુરિતકદમ્બસ્તુતમુખ ડિમ્ભ
પ્રિય રવિબિમ્બોદયપરિજૃમ્ભોન્મુખલસદમ્ભોરુહમુખ લમ્બો
ધ્બટભુજ લમ્બોદરવરકુમ્ભોપમકુચબિમ્બોષ્ઠયુવતિચુમ્બો
દ્ભટપરિરમ્ભોત્સુક કુરુ શં ભોસ્તડિદવલમ્બોર્જિતમિલદમ્ભો
ધરસુવિડમ્બોદ્ભુર નતશમ્ભો પરિજિતદમ્ભોલિગરિમસમ્ભા
વિતભુજજમ્ભાહિતમદ લમ્પાકમનસિ સમ્પાદય મયિ તં પા
કિમમનુકમ્પાલવમિહ
॥ ધીર ॥

દિવ્યે દણ્ડધરસ્વસુસ્તટભવે ફુલ્લાટવીમણ્ડલે
    વલ્લીમણ્ડપભાજિ લબ્ધમદિરસ્તમ્બેરમાડમ્બરઃ ।
કુર્વન્નઞ્જનપુઞ્જગઞ્જનમતિશ્યામાઙ્ગકાન્તિશ્રિયા
    લીલાપાઙ્ગતરઙ્ગિતેન તરસા માં હન્ત સન્તર્પય ॥ ૩૦॥

અમ્બુજકિરણવિડમ્બક
ખઞ્જનપરિચલદમ્બક
ચુમ્બિતયુવતિકદમ્બક
કુન્તલલુઠિતકદમ્બક
॥ વીર ॥

## ૧૫

પ્રેમોદ્વેલ્લિતવલ્ગુભિર્વલયિતસ્ત્વં વલ્લવીભિર્વિભો
    રાગોલ્લાપિતવલ્લકીવિતતિભિઃ કલ્યાણવલ્લીભુવિ ।
સોલ્લુણ્ઠં મુરલીકલાભિરમલં મલ્લારમુલ્લાસયન્
    બાલ્યેનોલ્લસિતે દૃશૌ મમ તડિલ્લીલાભિરુત્ફુલ્લય ॥ ૩૧॥

॥ ફુલ્લામ્બુજમ્ ॥

વ્રજપૃથુપલ્લીપરિસરવલ્લીવનભુવિ તલ્લીગણભૃતિ મલ્લી
મનસિજભલ્લીજિતશિવમલ્લીકુમુદમતલ્લીજુષિ ગતઝિલ્લી
પરિષદિ હલ્લીસકસુખઝલ્લીરત પરિફુલ્લીકૃતચલચિલ્લી
જિતરતિમલ્લીમદભર સલ્લીલતિલક કલ્યાતનુશતતુલ્યા
હવરસકુલ્યાચટુલિતખલ્યાપ્રમથન કલ્યાણચરિત
॥ ધીર ॥

ગોપીઃ સમ્ભૃતચાપલચાપલતાચિત્રયા ભ્રુવા ભ્રમયન્ ।
વિલસ યશોદાવત્સલ વત્સલસદ્ધેનુસંવીત ॥ ૩૨॥

વલ્લવલીલાસમુદયસમુચિત પલ્લવરાગાધરપુટવિલસિત
વલ્લભગોપીપ્રવણિત મુનિગણદુર્લભકેલીભરમધુરિમકણ
મલ્લવિહારાદ્ભુતતરુણિમધર ફુલ્લમૃગાક્ષીપરિવૃતપરિસર
ચિલ્લિવિલાસાર્પિતમનસિજમદ મલ્લિકલાપામલપરિમલપદ
રલ્લકરાજીહરસુમધુરકલ હલ્લકમાલાપરિવૃતકચકુલ

॥ વીર ॥

## ૧૬

વલ્લવલલનાવલ્લીકરપલ્લવશીલિતસ્કન્ધમ્ ।
ઉલ્લસિતઃ પરિફુલ્લં ભજામ્યહં કૃષ્ણકઙ્કેલ્લિમ્ ॥ ૩૩॥

॥ ચમ્પકમ્ ॥

સઞ્ચલદરુણચઞ્ચલકરુણસુન્દરનયન કન્દરશયન
વલ્લવશરણ પલ્લવચરણ મઙ્ગલઘુસૃણપિઙ્ગલમસૃણ
ચન્દનરચન નન્દનવચન ખણ્ડિતશકટ દણ્ડિતવિકટ
ગર્વિતદનુજ પર્વિતમનુજ રક્ષિતધવલ લક્ષિતગવલ
પન્નગદલન સન્નગકલન બન્ધુરવલન સિન્ધુરચલન
કલ્પિતમદનજલ્પિતસદન મઞ્જુલમુકુટ વઞ્જુલલકુટ
રઞ્જિતકરભ ગઞ્જિતશરભમણ્ડલવલિત કુણ્ડલચલિત
સન્દિતલપન નન્દિતતપનકન્ચકસુષુમ વન્ચકકુસુમ
ગર્ભક વિરણદર્ભકશરણ તર્ણકવલિત વર્ણકલલિત
શં વરવલય ડમ્બર કલય
॥ દેવ ॥

દાનવઘટાલવિત્રે ધાતુવિચિત્રે જગચ્ચિત્રે ।
હૃદયાનન્દિચરિત્રે રતિરાસ્તાં બલ્લવીમિત્રે ॥ ૩૪॥

રિઙ્ગદુરુભૃઙ્ગતુઙ્ગગિરિશૃઙ્ગ
રુતભઙ્ગસઙ્ગધૃતરઙ્ગ
॥ વીર ॥

## ૧૬

ત્વમત્ર ચણ્ડાસુરમણ્ડલીનાં
 રણ્ડાવશિષ્ટાનિ ગૃહાણિ કૃત્વા ।
પૂર્ણાન્યકાર્ષીર્વ્રજસુન્દરીભિ-
 ર્વૃન્દાટવીપુણ્ડ્રકમણ્ડપાનિ ॥ ૩૬॥

॥ વઞ્જુલમ્ ॥

જય જય સુન્દરવિહસિત મન્દરવિજિતપુરન્દર નિજગિરિકન્દર
રતિરસશન્ધર મણિયુતકન્ધર ગુણમણિમન્દિર હૃદિ વલદિન્દિર
ગતિજિતસિન્ધુર પરિજનબન્ધુર પશુપતિનન્દન તિલકિતચન્દન
વિધિકૃતવન્દન પૃથુહરિચન્દનપરિવૃતનન્દનમધુરિમનિન્દન
મધુવન વન્દિતકુસુમસુગન્ધિતવનવરરઞ્જિત રતિભરસઞ્જિત
શિખિદલકુણ્ડલસહકૃતભણ્ડિલ નવસિતતન્દુલજયિરદમણ્ડલ
રતિરણપણ્ડિત વરતનુભણ્ડિત નખપદમણ્ડિત દશનવિખણ્ડિત
॥ ધીર ॥

નિનિન્દ નિજમિન્દિરા વપુરવેક્ષ્ય યાસાં શ્રિયં
વિચાર્ય ગુણચાતુરીમચલજા ચ લજ્જાં ગતા ।
લસત્પશુપનન્દિનીતતિભિરાભિરાનન્દિતં
ભવન્તમતિસુન્દરં વ્રજકુલેન્દ્ર વન્દેમહિ ॥ ૩૬॥

રસપરિપાટીસ્ફુટતરુવાટી
મનસિજઘાટીપ્રિય નવશાતીહર જય
॥ વીર ॥

## ૧૭

સમ્ભ્રાન્તૈઃ સષડઙ્ગપાતમભિતો વેદૈર્મુદા વન્દિતા
સીમન્તોપરિ ગૌરવાદુપનિષદ્દેવીભિરપ્યર્પિતા ।
આનમ્રં પ્રણવેન ચ પ્રણયતો હૃષ્ટાત્મનાભિષ્ટુતા
મૃદ્વી તે મુરલીરુતિર્મુરરિપો શર્માણિ નિર્માતુ નઃ ॥ ૩૭॥

॥ કુન્દમ્ ॥

નન્દકુલચન્દ્ર લુપ્તભવતન્દ્ર કુન્દજયિદન્ત દુષ્ટકુલહન્ત
રિષ્ટસુવસન્ત મિષ્ટસમુદન્ત સન્દલિતમલ્લિકન્દલિતવલ્લિ
ગુઞ્જદલિપુઞ્જમઞ્જુતરકુઞ્જલબ્ધરતિરઙ્ગ હૃદ્યજનસઙ્ગ
શર્મલસદઙ્ગ હર્ષકૃદનઙ્ગ મત્તપરપુષ્ટરમ્યકલઘુષ્ટ
ગન્ધભરજુષ્ટ પુષ્પવનતુષ્ટ કૃત્તખલયક્ષ યુદ્ધનયદક્ષ
વલ્ગુકચપક્ષબદ્ધશિખિપક્ષ પિષ્ટનતતૃષ્ણ તિષ્ઠ હૃદિ કૃષ્ણ
॥ વીર ॥

તવ કૃષ્ણ કેલિમુરલી
    હિતમહિતં ચ સ્ફુટં વિમોહયતિ ।
એકં સુધોર્મિસુહૃદા
    વિષવિષમેણાપરં ધ્વનિના ॥ ૩૮॥

સન્નીતદૈતેયનિસ્તાર કલ્યાણકારુણ્યવિસ્તાર
પુષ્પેષુ કોદણ્ડટઙ્કારવિસ્ફારમઞ્જીરઝઙ્કાર
॥ વીર ॥

## ૧૮

રઙ્ગસ્થલે તાણ્ડવમણ્ડલેન
    નિરસ્ય મલ્લોત્તમપુણ્ડરીકાન્ ।
કંસદ્વિષં ચણ્ડમખણ્ડયદ્ યો
    હૃત્પુણ્ડરીકે સ હરિસ્તવાસ્તુ ॥ ૩૯॥

॥ બકુલભાસુરમ્ ॥

જય જય વંશીવાદ્યવિશારદ શારદસરસીરુહપરિભાવક
ભાવકલિતલોચનસઞ્ચારણ ચારણસિદ્ધવધૂધૃતિહારક
હારકલાપરુચાઞ્ચિતકુણ્ડલ કુણ્ડલસદ્ગોવર્ધનભૂષિત
ભૂષિતભૂષણચિદ્ઘનવિગ્રહ વિગ્રહખણ્ડિતખલવૃષભાસુર
ભાસુરકુટિલકચાર્પિતચન્દ્રક ચન્દ્રકલાપરુચાભ્યધિકાનન
કાનનકુઞ્જગૃહસ્મરસઙ્ગર સઙ્ગરસોદ્ધુરબાહુભુજઙ્ગમ
જઙ્ગમનવતાપિચ્છનગોપમ ગોપમનીષિતસિદ્ધિષુ દક્ષિણ
દક્ષિણપાણિગદણ્ડસભાજિત ભાજિતકોટિશશાઙ્કવિરોચન
રોચનયા કૃતચારુવિશેષક શેસકમલભવસનકસનન્દન
નન્દનગુણ મા નન્દય સુન્દર
॥ વીર ॥

ભવતઃ પ્રતાપતરણાવુદેતુમિહ લોહિતાયતિ સ્ફીતે ।
દનુજાન્ધકારનિકરાઃ શરણં ભેજુર્ગુહાકુહરમ્ ॥ ૪૦॥

પુલિનધૃતરઙ્ગયુવતિકૃતસઙ્ગ

મદનરસભઙ્ગગરિમલસદઙ્ગ
॥ વીર ॥

## ૧૯

પશુષુ કૃપાં તવ દૃષ્ટ્વા નૂનમિહારિષ્ટવત્સકેશિમુખાઃ ।
દર્પં વિમુચ્ય ભીતાઃ પશુભાવં ભેજિરે દનુજાઃ ॥ ૪૧॥

॥ બકુલમઙ્ગલમ્ ॥

ત્વં જય કેશવ કેશબલસ્તુત વીર્યવિલક્ષણ લક્ષણબોધિત
કેલિષુ નાગર નાગરણોદ્ધત ગોકુલનન્દન નન્દનતિવ્રત
સાન્દ્રમુદર્પક દર્પકમોહન હે સુષમાનવમાનવતીગણ
માનનિરાસક રાસકલાશ્રિત સસ્તનગૌરવગૌરવધૂવૃત
કુબ્જશતોષિત તોષિતયૌવત રૂપભરાધિકરાધિકયાર્ચિત
ભીરુવિલમ્બિત લમ્બિતશેખર કેલિકુલાલસલાલસલોચન
રોષમદારુણદારુણદાનવમુક્તિદલોકન લોકનમસ્કૃત
ગોપસભાવક ભાવકશર્મદ હન્ત કૃપાલય પાલય મામપિ
॥ વીર ॥

પરાભવં ફેનિલવક્ત્રતાં ચ
    બન્ધં ચ ભીતિં ચ મૃતિં ચ કૃત્વા ।
પવર્ગદાતાપિ શિખણ્ડમૌલે
    ત્વં શાત્રવાણામપવર્ગદોઽસિ ॥ ૪૨॥

પ્રણયભરિતમધુરચરિત
ભજનસહિતપશુપમહિત
॥ દેવ ॥

## ૨૦

નવશિખિશિખણ્ડશિખરા
    પ્રસૂનકોદણ્ડચિત્રશસ્ત્રીવ ।
ક્ષોભયતિ કૃષ્ણ વેણી
    શ્રેણીરેણીદૃશાં ભવતઃ ॥ ૪૩॥

અનુભૂય વિક્રમં તે યુધિ
    લબ્ધાઃ કાન્દિશીકત્વમ્ ।
ભિત્ત્વા કિલ જગદણ્ડં
    પ્રપલાયાઞ્ચક્રિરે દનુજાઃ ॥ ૪૪॥

॥ મઞ્જર્યાં કોરકઃ ॥

માનવતીમદહારિવિલોચન દાનવસઞ્ચયઘૂકવિરોચન
ડિણ્ડિમવાદિસુરાલિસભાજિત ચણ્ડિમશાલિભુજાર્ગલરાજિત
દીક્ષિતયૌવતચિત્તવિલોભનવીક્ષિત સુસ્મિતમાર્દવશોભન
પર્વતસન્ધૃતિનિર્ધુતપીવરગર્વતમઃપરિમુગ્ધશચીવર
રઞ્જિતમઞ્જુપરિસ્ફુરદમ્બર ગઞ્જિતકેશિપરાક્રમડમ્બર
કોમલતાઙ્કિતવાગવતારક સોમલલામમહોત્સવકારક
હંસરથસ્તુતિશંસૈતવંશક કંસવધૂશ્રુતિનુન્નવતંસક
રઙ્ગતરઙ્ગિતચારુદૃગઞ્ચલ સઙ્ગતપઞ્ચશરોદયચઞ્ચલ
લુઞ્ચિતગોપસુતાગણશાટક સઞ્ચિતરઙ્ગમહોત્સવનાટક
તારય મામુરુસંસૃતિશાતન ધારય લોચનમત્ર સનાતન
॥ ધીર ॥

તુરગદનુસુતાઙ્ગગ્રાવભેદે દધાનઃ
    કુલિશઘટિતટઙ્કોદ્દણ્ડવિસ્ફૂર્જિતાનિ ।
તદુરુવિકટદંષ્ટ્રોન્મૃષ્ટકેયૂરમુદ્રઃ
    પ્રથયતુ પટુતાં વઃ કૈશવો વામબાહુઃ ॥ ૪૫॥ ૨
માધવ વિસ્ફુર દાનવનિષ્ઠુર
યૌવતરઞ્જિત સૌરભસઞ્જિત
॥ વીર ॥

## ૨૧

પલિતઙ્કરણી દશા પ્રભો મુહુરન્ધઙ્કરણી ચ માં ગતા ।
સુભઙ્કરણી કૃપા શુભૈર્ન તવાઢઙ્કરણી ચ મય્યભૂત્ ॥ ૪૬॥

॥ ગુચ્છઃ ॥

જય જલદમણ્ડલીદ્યુતિનિવહસુન્દર

સ્ફુરદમલકૌમુદીમૃદુહસિતબન્ધુર
વ્રજહરિણલોચનાવદનશશિચુમ્બક
પ્રચુરતરખઞ્જનદ્યુતિવિલસદમ્બક
સ્મરસમરચાતુરીનિચયવરપણ્ડિત
પ્રણયયુતરાધિકાપટિમભરભણ્ડિત
ક્વણદતુલવંશિકાહૃતપશુપયૌવત
સ્થિરસમરમાધુરીકુલરમિતદૈવત
ગ્રથિતશિખિચન્દ્રકસ્ફુટકુટિલકુન્તલ
શ્રવણતટસઞ્ચરન્મણિમકરકુણ્ડલ
ગ્રથિતનવતાણ્ડવપ્રકટગતિમણ્ડલ
દ્વિજકિરણધોરણીવિજિતસિતતણ્ડુલ
સ્ફુરિતવરદાડિમીકુસુમયુતકર્ણક
છદનવરકાકલીહૃતચટુલતર્ણક
॥ ધીર ॥

પુન્નાગસ્તવકનિબદ્ધકેશજુટઃ
    કોટીરીકૃતવરકેકિપક્ષકૂટઃ ।
પાયાન્ માં મરકતમેદુરઃ સ તન્વા
    કાલિન્દીતટવિપિનપ્રસૂનધન્વા ॥ ૪૭॥

ગર્ગપ્રિય જય ભર્ગસ્તુત રસ
સર્ગસ્થિરનિજવર્ગપ્રવણિત
॥ વીર ॥

## ૨૨

દનુજવધૂવૈધવ્યવ્રતદીક્ષાશિક્ષણાચાર્યઃ ।
સ જયતિ વિદૂરપાતી મુકુન્દ તવ શૃઙ્ગનિર્ઘોષઃ ॥ ૪૮॥

॥ કુસુમમ્ ॥

કુસુમનિકરનિચિતચિકુર નખરવિજિતમણિજમુકુર
સુભટપટિમરમિતમથુર વિકટસમરનટનચતુર
સમદભુજગદમનચરણ નિખિલપશુપનિચયશરણ
મુદિતમદિરમધુરનયન શિખરિકુહરરચિતશયન

રમિતપશુપયુવતિપટલ મદનકલહઘટનચટુલ
વિષમદનુજનિવહમથન ભુવનરસદવિશદકથન
કુમુદમૃદુલવિલસદમલહસિતમધુરવદનકમલ
મધુપસદૃશવિચલદલક મસૃણઘુસૃણકલિતતિલક
નિભૃતમુષિતમથિતકલસ સતતમજિત મનસિ વિલસ
॥ વીર ॥

સખિચાતકજીવાતુર્માધવ
    સુરકેકિમણ્ડલોલ્લાસિ ।
તવ દૈત્યહંસભયદં
    શૃઙ્ગામ્બુદગર્જિતં જયતિ ॥ ૪૯॥

પુરુષોત્તમ વીરવ્રત યમુનાદ્ભુતતીરસ્થિત
મુરલિધ્વનિપૂરક્રિય સુરભીવ્રજનાદપ્રિય
॥ ધીર ॥

## ૨૩

જગતીસભાવલમ્બઃ
    સ તવ જયત્યમ્બુજાક્ષ દોઃસ્તમ્ભઃ ।
રભસાદ્ વિભેદ દનુજાન્
    પ્રતાપનૃહરિર્યતોઽભ્યુદિતઃ ॥ ૫૦॥

ચિત્રં મુરારે સુરવૈરિપક્ષ-
    સ્ત્વયા સમન્તાદનુબદ્ધયુદ્ધઃ ।
અમિત્રમુચ્ચૈરવિભિદ્ય ભેદં
    મિત્રસ્ય કુર્વન્નમૃતં પ્રયાતિ ॥ ૫૧॥

॥ ત્રિભઙ્ગ્યાં દણ્ડકત્રિભઙ્ગી ॥

શ્રિતમઘજલધેર્વહિત્રં ચરિત્રં સુચિત્રં વિચિત્રં
ફણિત્રં સમિત્રં પવિત્રં લવિત્રં રુજાં
જગદપરિમિતપ્રતિષ્ઠં પટિષ્ઠં બલિષ્ઠં ગરિષ્ઠં
વરિષ્ઠં મ્રદિષ્ઠં સુનિષ્ઠં દવિષ્ઠં ધિયાં
નિખિલવિલસિતેઽભિરામં સરામં મુદા મઞ્જુદામ-

ન્નભામં લલામં ધૃતામન્દધામત્રયે
મધુમથન હરે મુરારે પુરારે પારે સસારે
વિહારે સુરારેરુદારે ચ દારે પ્રભું
સ્ફુર્તમિનસુતાતરઙ્ગે વિહઙ્ગેશરઙ્ગેણ ગઙ્ગે
ષ્ટભઙ્ગે ભુજઙ્ગેન્દ્રસઙ્ગે સદઙ્ગેન ભોઃ
શિખરિવિરદરીનિશાન્તં પ્રયાન્તં સકાન્તં વિભાન્તં
નિતાન્તં ચ કાન્તં પ્રશાન્તં કૃતાન્તં દ્વિષાં
દનુજહર ભજામ્યનન્તં સુદન્તં નુદન્તં દૃગન્તં
હસન્તં વસન્તં ભજન્તં ભવન્તં સદા
॥ વીર ॥

પીત્વા બિન્દુકણં મુકુન્દ ભવતઃ સૌન્દર્યસિન્ધોઃ સકૃત્
    કન્દર્પસ્ય વશં ગતા વિમુમુહુઃ કે વા ન સાધ્વીગણાઃ ।
દૂરે રાજ્યમયન્ત્રિતસ્મિતકલાભ્રૂવલ્લરીતાણ્ડવ
    ક્રીડાપાઙ્ગતરઙ્ગિતપ્રભૃતયઃ કુર્વન્તુ તે વિભ્રમાઃ ॥ ૫૨॥

ચારુતટરાસનટ ગોપભટ પીતપટ
પદ્મકર દૈત્યહર કુઞ્જચર વીરવર
નર્મમય કૃષ્ણ જય
॥ નાથ ॥

## ૨૪

સંસારામ્ભસિ દુસ્તરોર્મિગહને ગમ્ભીરતાપત્રયી
    કુમ્ભીરેણ ગૃહીતમુગ્રમતિના ક્રોશન્તમન્તર્ભયાત્ ।
દીપ્રેણાદ્ય સુદર્શનેન વિબુધક્લાન્તિચ્છિદાકારિણા
    ચિન્તાસન્તતિરુદ્ધમુદ્ધર હરે મચ્ચિત્તદન્તીશ્વરમ્ ॥ ૫૩॥

॥ વિદગ્ધત્રિભઙ્ગી ॥

ચણ્ડીપ્રિયનત ચણ્ડીકૃતબલરણ્ડીકૃતખલવલ્લભ વલ્લવ
પટ્ટામ્બરધર ભટ્ટારક બકકુટ્ટાક લલિતપણ્ડિતમણ્ડિત
નન્દીશ્વરપતિનન્દીહિતભર સન્દીપિતરસસાગર નાગર
અઙ્ગીકૃતનવસઙ્ગીતક વરભઙ્ગીલવહૃતજઙ્ગમલઙ્ગિમ
ઊર્વીપ્રિયકર ખર્વીકૃતખલદર્વીકરપતિગર્વિતપર્વત

ગોત્રાહિતકર ગોત્રાહિતદય ગોત્રાધિપધૃતિશોભનલોભન
વન્યાસ્થિતબહુકન્યાપટહર ધન્યાશયમણિચોર મનોરમ
શમ્પારુચિપટ સમ્પાલિતભવકમ્પાકુલજન ફુલ્લ સમુલ્લસ
॥ ધીર ॥

પિષ્ટ્વા સઙ્ગ્રામપટ્ટે પટલમકુટિલે દૈત્યગોકણ્ટકાનાં
    ક્રીડાલોટીવિઘટ્ટૈઃ સ્ફુટમરતિકરં નૈચિકીચારુકાણામ્ ।
વૃન્દારણ્યં ચકારાખિલજગદગદહ્રારકારુણ્યધારો
    યઃ સઞ્ચારોચિતં વઃ સુખયતુ સ પટુઃ કુઞ્જપટ્ટાધિરાજઃ ॥ ૪૫॥

પિચ્છલસદ્ઘનનીલકેશ ચન્દનચર્ચિતચારુવેશ
ખણ્ડિતદુર્જનભૂર્માય મણ્ડિતનિર્મલહારિકાય
॥ વીર ॥

## ૨૫

ગીર્વાણં સ્ફુટમખિલં વિવર્ધયન્તં
    નિર્વાણં દનુજઘટાસુ સઙ્ઘટય્ય ।
કુર્વાણં વ્રજનિલયં નિરન્તરોદ્ધત્
    પર્વાણં મુરમથન સ્તુવે ભવન્તમ્ ॥ ૫૫॥

ઉદઞ્ચદતિમઞ્જુલસ્મિતસુધોર્મિલીલાસ્પદં
    તરઙ્ગિતવરાઙ્ગનાસ્ફુરદનઙ્ગરઙ્ગામ્બુધિઃ ।
દૃગિન્દુમણિમણ્ડલીસલિલનિર્ઝરસ્યન્દનો
    મુકુન્દ મુખચન્દ્રમાસ્તવ તનોતિ શર્માણિ નઃ ॥ ૫૬॥

॥ મિશ્રકલિકા ॥

દુષ્ટદુર્દમારિષ્ટકણ્ઠીરવકુણ્ઠવિખણ્ડનખેલદષ્ટાપદ નવીનાષ્ટાપદ
વિસ્પર્ધિપટ્ટામ્બરપરીત ગરિષ્ઠગણ્ડશૈલસપિણ્ડવક્ષઃપટ્ટ પાટવ
દણ્ડિતચટુલભુજઙ્ગમ કન્દુકવિલસિતલઙ્ઘિમ
ભણ્ડિલવિચકિલમણ્ડિત સઙ્ગરવિહરણપણ્ડિત
દન્તુરદનુજવિડમ્બક કુણ્ઠિતકુટિલકદમ્બક
ખચિતાખણ્ડલોપલવિરાજદણ્ડજરાજકુણ્ડલમણ્ડિતમઞ્જુલગણ્ડસ્થલ
વિશઙ્કટભાણ્ડીરતટીતાણ્ડવકલારઞ્જિતસુહૃન્મણ્ડલ નન્દવિચુમ્બિત

કુન્દનિભસ્મિત ગન્ધકરમ્બિત શન્દવિચેષ્ટિત તુન્દપરિસ્ફુરદણ્ડકડમ્બર
દુર્જનભોજેન્દ્રકણ્ટકકન્દોદ્ધારણોદ્દામકુદ્દાલ વિનમ્રવિપદ્દારુણધ્વાન્ત
વિદ્રાવણમાર્તણ્ડોપમકૃપાકટાક્ષ શારદાચણ્ડમરીચિમાધુર્યવિડમ્બિ
તુણ્ડમણ્ડલ લોષ્ઠીકૃતમણ્ડિકોષ્ઠીકુલમુનિગોષ્ઠીશ્વર મધુરોષ્ઠીપ્રિય
પરમેષ્ઠીડિત પરમેષ્ઠીકૃતનર
॥ ધીર ॥

## ૨૬

ઉપહિતપશુપાલીનેત્રસારઙ્ગતુષ્ટિઃ
    પ્રસરદમૃતધારાધોરણીધૌતવિશ્વા ।
પિહિતરવિસુધાંશુઃ પ્રાંશુતાપિઞ્છરમ્યા
    રમયતુ બકહન્તુઃ કાન્તિકાદમ્બિની વઃ ॥ ૫૭॥

॥ અથવા સાપ્તવિભક્તિકી કલિકા ॥

યઃ સ્થિરકરુણસ્તર્જિતવરુણસ્તર્પિતજનકઃ સમ્મદજનકઃ
પ્રણતવિમાયં જગુરનપાયં ઘનરુચિકાયં સુકૃતજના યં
સુજનકલિતકથનેન પ્રબલદનુજમથનેન
પ્રણયિષુ રતમભયેન પ્રકટરતિષુ કિલ યેન
યસ્મૈ પરિધ્વસ્તદુષ્ટાય ચક્રુઃ સ્પૃહાં માલ્યજુષ્ટાય
ધૃતોત્સાહપૂરાદ્દ્યુતિક્ષિપ્તસૂરાદ્ યતોઽરિર્વિદૂરાદ્ ભયં પ્રાપ શૂરાત્ ।
યસ્યોજ્જ્વલાઙ્ગસ્ય સઞ્ચાર્યપાઙ્ગસ્ય વેણુર્લલામસ્ય હસ્તેઽભિરામસ્ય
સ્મિતવિસ્ફુરિતેઽજનિ યત્ર હિતે રતિરુલ્લસિતે સુદૃશાં લલિતે ।
સ ત્વં જય જય દુષ્ટપ્રતિભય ભક્તિસ્થિરદય લુપ્તવ્રજભય
॥ વીર ॥

હંસોત્તમાભિલષિતા સેવકચક્રેષુ દર્શિતોત્સેકા ।
મુરજયિનઃ કલ્યાણી કરુણાકલ્લોલિની જયતિ ॥ ૫૮॥

મિત્રકુલોદિતનર્મસુમોદિત
રઞ્જિતરાધિક શર્મભરાધિક
॥ ધીર ॥

## ૨૭

મધુરેશ માધુરીમય માધવ મુરલીમતલ્લિકામુગ્ધ ।
મમ મદનમોહન મુદા મર્દય મનસો મહામોહમ્ ॥ ૫૯॥

॥ અક્ષરમયી ॥

અચ્યુત જય જય આર્તકૃપામય ઇન્દ્રમખાર્દન ઈતિવિશાતન
ઉજ્જ્વલવિભ્રમ ઊર્જિતવિક્રમ ઋદ્ધિધુરોદ્ધુર એભુદયાપર
ૡદિવકૃપેક્ષિત ૡલવદલક્ષિત એધિતવલ્લવ ઐન્દવકુલભવ
ઓજઃસ્ફૂર્જિત ઔગ્ર્યવિવર્જિત અંસવિશઙ્કુટ અષ્ટાપદપટ
કઙ્કણયુતકર ખણ્ડિતખલવર ગતિજિતકુઞ્જર ઘનઘુસૃણામ્બર
ઙુતમુરલીરત ચલચિલ્લીલત છલિતસતીશત જલજોદ્ભવનુત
ઝષવરકુણ્ડલ ઞોઙુયિતદલ ટઙ્કિતભૂધર ઠનિભાનનવર
ડમરઘટાહર ઢક્કિતકરતલ ણખરધૃતાચલ તરલવિલોચન
થૂત્કૃતખઞ્જન દનુજવિમર્દન ધવલાવર્ધન નન્દસુખાસ્પદ
પઙ્કજસમપદ ફઞ્નુતિમોદિત બન્ધુવિનોદિત ભઙ્ગુરિતાલક
મઞ્જુલમાલક યષ્ટિલસદ્ભુજ રમ્યમુખામ્બુજ લલિતવિશારદ
વલ્લવરઙ્ગદ શર્મદચેષ્ટિત ષટ્પદવેષ્ટિત સરસીરુહધર
હલધરસોદર ક્ષણદગુણોત્કર
॥ વીર ॥

કર્ણે કલ્પિતકર્ણિકઃ કલિકયા કામાયિતઃ કાન્તિભિઃ
    કાન્તાનાં કિલકિઞ્ચિતં કિસલયકીલાલધીઃ કીર્તિભિઃ ।
કુર્વન્કૂર્દનકાનિ કેશરિતયા કૈશોરવાન્કોટિશઃ
    કોપી કૌકુરકંસકષ્ટકૃતિકઃ કૃષ્ણઃ ક્રિયાત્ કાઙ્ક્ષિતમ્ ॥ ૬૦॥

સૌરીતટચર ગૌરીવ્રતપર
ગૌરીપટહર ચૌરીકૃતકર
॥ વીર ॥

## ૨૮

પ્રેમોરુહટ્ટહિણ્ડક કક્ખટસુભટેન્દ્રકણ્ઠકુટ્ટાક ।
કુરુ કૌઙ્કુમપટ્ટામ્બર ભટ્ટારક તાણ્ડવં હૃદિ મે ॥ ૬૧॥

॥ સર્વલઘુઃ ॥

ચરણચલનહતજરઠશકટક
રજકદલન વશગતપરકટક
નટનઘટનલસદગવરકટક
સકનકમરકતમયનવકટક
કપટરુદિત નટદકઠિનપદતટ
વિઘટિતદધિઘટનિવિડિતસુશકટ
રુચિતુલિતપુરટપટલરુચિરપટ
ઘટિતવિપુલકટ કુટિલચિકુરઘટ
રવિદુહિતૃનિકટલુઠદજરઠજટ
વિટપનિચિતવટતટપટુતરનટ
નિજવિલસિતહઠવિચટિતસુવિકટ
ચટુલદનુજઘટ જય યુવતિષુ શઠ
॥ વીર ॥

સ્ફુટનાટ્યકડમ્બદણ્ડિત
 દ્રઢિમોડ્ડામરદુષ્ટકુણ્ડલી ।
જય ગોષ્ઠકુટુમ્બસંવૃત્ત-
 સ્ત્વમિડાડિમ્બકદમ્બડુમ્બક ॥ ૬૨॥

રસનમુખર સુખરનખર
દશનશિખરવિજિતશિખર
॥ ધીર ॥

વિવૃતવિવિધબાધે ભ્રાન્તિવેગાદગાધે
 બલવતિ ભવપૂરે મજ્જતો મેઽવિદૂરે ।
અશરણગણબન્ધો હે કૃપાકૌમુદીન્દો
 સકૃદકૃતવિલમ્બં દેહિ હસ્તાવલમ્બમ્ ॥ ૬૩॥

નામાનિ પ્રણયેન તે સુકૃતિનાં તન્વન્તિ તુણ્ડોત્સવં
 ધામાનિ પ્રથયન્તિ હન્ત જલદશ્યામાનિ નેત્રાઞ્જનમ્ ।
સામાનિ શ્રુતિશષ્કુલીં મુરલિકાજાતાન્યલઙ્કુર્વતે
 કામાનિ નિર્વૃતચેતસામિહ વિભો નાશાપિ નઃ શોભતે ॥ ૬૪॥

વ્યુત્પન્નઃ સુસ્થિરમતિર્ગતગ્લાનિર્ગલસ્વનઃ ।

ભક્તઃ કૃષ્ણે ભવેદ્ યઃ સ વિરુદાવલિપાઠકઃ ॥ ૬૫॥

રમ્યયા વિરુદાવલ્યા પ્રોક્તલક્ષણયુક્તયા ।
સ્તૂયમાનઃ પ્રમુદિતો વાસુદેવઃ પ્રસીદતિ ॥ ૬૬॥

યઃ સ્તૌતિ વિરુદાવલ્યા મથુરામણ્ડલે હરિમ્ ।
અનયા રમ્યયા તસ્મૈ તૂર્ણમેષ પ્રસીદતિ ॥ ૬૭॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં ગોવિન્દવિરુદાવલી સમાપ્તા ।

*Shri Govindavirudavali*
pdf was typeset on February 23, 2019

Please send corrections to *sanskrit@cheerful.com*